# शुद्धिकौमुदी

## पाठः ३ – ०६.०५.२०१७

## रूपलिङ्गवचनादिदोषाः

© All the content in these slides is the intellectual property of Vyoma Linguistic Labs Foundation.
Replication/reuse in any form without express written permission from the organisation is prohibited.

# रूपदोषाः

अक्षरत्यागः, विसर्गत्यागः, अन्त्यवर्ण निवेशः, अल्पप्राणमहाप्राणगताः दोषाः, रूपविषये भ्रमः इत्यादयः ।

---

| **अशुद्धम्** | **शुद्धम्** |
|---|---|
| १. नन्तरम् | १. अनन्तरम् |

'नन्तर'शब्दः संस्कृते नास्ति । न + अनन्तरम् । न अन्तरयोः समासे **अनन्तरम्**इति रूपम् ।

| | |
|---|---|
| २. ग्यानम् / ग्नानम् | २. ज्ञानम् |

'ज्ञ'कारं केचन प्रादेशिकभाषाप्रभावतः 'ग्यः' इति ('ग्न' इति वा) उच्चारयन्ति । तथा उच्चारणं लेखनं वा दोषाय । ज् + ञ् = ज्ञ । 'जञोर्ज्ञः' इति कौमुद्यां स्पष्टतया लिखितम् ।

# रूपदोषाः

| अशुद्धम् | शुद्धम् |
|---|---|
| ३. संग्या | ३. संज्ञा |

'**संज्ञा**' इत्यत्रापि 'ज्ञ'कारः एव उच्चारणीयः, लेखनीयः च । गकारयकारयोः योगेन 'ग्य' भवति । जकारञकारयोः योगेन 'ज्ञ' भवति । एवं, ग्य-ज्ञयोः स्पष्टः भेदः । गकारयकारयोगः एतस्मिन् शब्दे पूर्वस्मिन् शब्दे वा न इष्टः ।

| अशुद्धम् | शुद्धम् |
|---|---|
| ४. कठिणम् | ४. कठिनम् |

'कठिणम्' इत्यत्र यः णकारः (टवर्गपञ्चमः) श्रूयते, सः अस्थाने । क्वचित्, णकारः स्वाभाविकः भवति । यथा - अङ्गणम् । 'कठिण'पदे तादृशी स्थितिः अपि नास्ति । अतः, नकारः (तवर्गपञ्चमः) एव लेखनीयः । '**कठिनम्**' इत्येव शुद्धम् ।

# रूपदोषाः

| अशुद्धम् | शुद्धम् |
| --- | --- |
| ५. उद्टङ्कणम् | ५. उद्टङ्कनम् |

उद्टङ्कणम् इत्यत्रापि णकारः न निमित्तवशात् प्राप्तः, न वा स्वाभाविकः । अतः, णत्वम् अस्थाने । '**उद्टङ्कनम्**' इति नकारयुक्तं (तवर्गपञ्चमयुक्तं) रूपम् एव लेखनीयम् ।

| अशुद्धम् | शुद्धम् |
| --- | --- |
| ६. प्रकटणम् | ६. प्रकटनम् |

'प्रकटणम्' इत्यत्रापि णत्वम् अस्थाने । तवर्गपञ्चमोपेतं रूपम् (**प्रकटनम्**) एव शुद्धम् । उपसर्गनिमित्तकस्य णत्वस्य अत्र न प्रसक्तिः । टकारव्यवधानमपि नास्ति । अतः, कथमपि न णत्वम् ।

# रूपदोषाः

| अशुद्धम् | शुद्धम् |
|---|---|
| ७. पुनह | ७. पुनः |

’पुनर्’ इति रेफान्तम् अव्ययम् । रेफस्य विसर्गः । हकारस्य न प्रसक्तिः कथमपि ।

| | |
|---|---|
| ८. मनम् | ८. मनः |

मनश्शब्दः सकारान्तः, न तु अकारान्तः । अतः, ’मनम्’ इति रूपं प्रामादिकम् ।

| | |
|---|---|
| ९. दुखम् | ९. दुःखम् |

’दुःखम्’ इत्यत्र विसर्गः श्रूयते एव । ’दुर्’ इति उपसर्गः । तस्य विसर्गः । विसर्गलोपस्तु नास्ति ।

# रूपदोषाः

| अशुद्धम् | शुद्धम् |
|---|---|
| १०. ब्रम्हा | १०. ब्रह्मा |

वृद्ध्यर्थकस्य 'बृहि'धातोः मनिन्-प्रत्यये 'ब्रह्मा' इति रूपम् । धातुगतः हकारः एव आदौ लेखनीयः, मकारश्च अनन्तरम् । मकारस्य पूर्वलेखनं दोषाय ।

| | |
|---|---|
| ११. आल्हादः | ११. आह्लादः |

'आह्लादः' इत्यत्र यः 'ह्लादी'धातुः अस्ति, सः हकारादिः । अतः, हकारः एव आदौ लेखनीयः, न तु लकारः।

| | |
|---|---|
| १२. लक्ष्मी | १२. लक्ष्मीः |

'लक्ष्मीः' इति प्रथमैकवचनान्तः शब्दः । लक्ष्मीशब्दः न ङ्यन्तः । अतः, तस्य सुपो लोपः न । अतो विसर्गः श्रूयते एव ।

# रूपदोषाः

| अशुद्धम् | शुद्धम् |
| --- | --- |
| १३. श्री | १३. श्रीः |

’श्री’शब्दोऽपि न ङ्यन्तः, न तु क्विप्-प्रत्ययान्तः । अतः, तस्यापि प्रथमाविभक्त्यैकवचने न सुलोपः । अतः, ’श्रीः’ इति विसर्गसहितं रूपम् एव शुद्धम् ।

| | |
| --- | --- |
| १४. चञ्चू | १४. चञ्चूः |

अत्रापि सुलोपस्य न प्रसक्तिः । सकारः विसर्गः भवति ।

| | |
| --- | --- |
| १५. रुग्वेदः /रिग्वेदः | १५. ऋग्वेदः |

ऋच्यन्ते स्तूयन्ते देवाः अनया (ऋच-स्तुतौ + क्विप्) इति ऋक् । ऋक् + वेदः = ऋग्वेदः । ’ऋक्’शब्दः स्वरादिः, न तु रेफादिः । अतः, स्वरादिः(ऋ) एव साधुः ।

# रूपदोषाः

| अशुद्धम् | शुद्धम् |
|---|---|
| १६. रुषिः /रिषिः | १६. ऋषिः |

ऋषिशब्दः गत्यर्थकात् 'ऋषो'धातुतः निष्पन्नः । ऋषति ज्ञानेन संसारपापम् इति ऋषिः । शब्दोऽयम् अपि स्वरादिः । प्रादेशिकभाषासु रेफादिः क्वचित् लिख्यते भ्रान्त्या ।

| | |
|---|---|
| १७. वधू | १७. वधूः |

ऊकारान्तत्वात् न सुपः लोपः । सकारस्य विसर्गः ।

| | |
|---|---|
| १८. दधिः | १८. दधि |

नपुंसके सुप्-प्रत्ययस्य लोपः विहितः - "स्वमोर्नपुंसकात्" (पा.सू. ७.१.२३) इति सूत्रेण । अतः विसर्गः न श्रूयते ।


vyoma ॥ वाचं धेनुमुपासीत ॥ Saṃskṛtam · Value Education · Technology

# रूपदोषाः

| अशुद्धम् | शुद्धम् |
| --- | --- |
| १९. श्मश्रुः | १९. श्मश्रु |

अत्रापि सुपः लोपः एव (विसर्गलोपः) एव । अतः, ’**श्मश्रु**’ इति विसर्गरहितं रूपम् एव साधु।

| | |
| --- | --- |
| २०. जानुः | २०. जानु |

नपुंसकत्वात् अत्रापि विसर्गस्य अश्रवणम्। ’जानु’ इति विसर्गरहितं रूपं शुद्धम् ।

| | |
| --- | --- |
| २१. स्यालः | २१. श्यालः |

’श्याल’शब्दः शादेः ’श्यैङ्’धातोः उत्पन्नः । अतः, ’श्यालः’ इति शकारादिरूपम् एव युक्तम् । भगवद्गीतायां प्रयोगो यथा - ’मातुलाः श्वशुराः पौत्राः श्यालाः सम्बन्धिनस्तथा’ इति ।

# रूपदोषाः

| अशुद्धम् | शुद्धम् |
| --- | --- |
| २२. स्वशुरः | २२. श्वशुरः |

’श्वशुर’शब्दोऽपि शकारादिः, न सकारादिः । अतः, ’**श्वशुरः**’ इत्येव शुद्धम्।

| | |
| --- | --- |
| २३. स्वश्रू/श्वश्रू | २३. श्वश्रूः |

’श्वश्रू’शब्दोऽपि शकारादिः, ऊकारान्तस्त्रीलिङ्गः इत्यतः विसर्गस्य श्रवणं च । अतः, ’**श्वश्रूः**’ इति शुद्धम् ।

| | |
| --- | --- |
| २४. स्मशानम् | २४. श्मशानम् |

शवाः यत्र शेरते तत् श्मशानम् । तच्च शकारादिः । सकारादिः कुत्रापि न दृष्टचरः । अतः, ’श्मशानम्’ इत्येव लेखनीयम् ।

# रूपदोषाः

| अशुद्धम् | शुद्धम् |
|---|---|
| २५. हृस्वः | २५. ह्रस्वः |

'**ह्रस्वः**' इत्यत्र 'ह्रस'धातुः । सः रेफयुक्तः, न तु ऋकारयुक्तः । अतः, 'हृस्वः' इति ऋकारयुक्तस्य रूपस्य प्रयोगः तु भ्रान्त्या । रेफः एव प्रयोक्तव्यः ।

| अशुद्धम् | शुद्धम् |
|---|---|
| २६. बहुर्व्रीहिः | २६. बहुव्रीहिः |

'**बहुव्रीहिः**' इत्येव शुद्धम् । 'शेषो बहुव्रीहिः' (पा.सू. २.२.२३) इति पाणिनिसूत्रे प्रयोगः । बहुर्व्रीहिः इति अज्ञातमूलः प्रयोगः।

| अशुद्धम् | शुद्धम् |
|---|---|
| २७. प्रभोदनम् | २७. प्रबोधनम् |

'प्रबोधनम्' इत्यत्र बुधधातुः । तत्र बकारः अल्पप्राणः, न तु महाप्राणः । अतः, '**(प्र)बोधनम्**' इति रूपं शुद्धम्।


vyoma ॥ वाचं धेनुमुपासीत ॥ Saṃskṛtam · Value Education · Technology

# रूपदोषाः

| अशुद्धम् | शुद्धम् |
| --- | --- |
| २८. अघादः | २८. अगाधः |

'**अगाधः**' इत्यत्र 'गाधृ'धातुः । तत्र गकारः कवर्गतृतीयः। गकारस्य महाप्राणता तु भ्रान्त्या ।

| | |
| --- | --- |
| २९. घर्जनम् | २९. गर्जनम् |

'**गर्जनम्**' इत्यत्र 'गर्ज'धातुः । तत्र गकारः अल्पप्राणः । व्याघ्रादीनां स्वभावः कठोरः भवतीति गर्जनशब्दे महाप्राणप्रयोगः एव वर्म् इति तु बालिशाः मन्यन्ते ।

| | |
| --- | --- |
| ३०. निश्वस्य | ३०. निःश्वस्य/निश्श्वस्य |

'**निःश्वस्य**' इत्यत्र श्वसधातुः, निस् इति उपसर्गः च । श्वसधातौ आदौ शकारः अस्ति एव । 'निस्' इत्यत्र उपसर्गे यः सकारः तस्य लोपः तु नास्ति कथमपि । अतः, सः सकारः विसर्गरूपेण शकाररूपेण वा दृश्येत परिनिष्ठिते रूपे ।

# रूपदोषाः

| अशुद्धम् | शुद्धम् |
| --- | --- |
| ३१. शत्रुप्रत्ययः | ३१. शतृप्रत्ययः |

’**शतृ**’प्रत्ययः इत्यत्र प्रत्ययस्य नाम ’शतृ’ इति, न तु ’शत्रु’ इति । ’वैरी’ इत्यस्य अर्थस्य बोधकं पदं ’शत्रुः’ इति । भ्रान्तैः कदाचित् तयोः व्यामिश्रणं क्रियते ।

| अशुद्धम् | शुद्धम् |
| --- | --- |
| ३२. नाण्यकम् | ३२. नाणकम् |

नाणकं नाम मुद्राङ्कितं वस्तु (Coin)। प्रयोगो यथा - ’एषा **नाणक**मोषिका.......’ (मृच्छकटिके - १२३) । ’नाण्यक’शब्दस्तु कुत्रापि न प्रयुक्तपूर्वः ।

| अशुद्धम् | शुद्धम् |
| --- | --- |
| ३३. कोट्याधिपतिः | ३३. कोट्यधिपतिः |

कोटि + अधिपतिः = कोट्यधिपतिः । सन्ध्यनन्तरम् आकारस्य प्रवेशस्य न कापि प्रसक्तिः । ’आधिपतिः’ इति तु पदं नास्ति । अतः, ’कोट्यधिपतिः’ इत्येव साधु ।

# रूपदोषाः

**अशुद्धम्** | **शुद्धम्**

३४. श्रुणोति/श्रृणोति — ३४. शृणोति

'शृणोति' इति शुद्धं रूपम् । यद्यपि धातुः'श्रु' इति, तथापि 'श्रुवः शृ च' (पा.सू. ३.१.७४) इति सूत्रेण 'शृ' इति आदेशः स्यात् लडादिषु लकारेषु (शपि)। अतः, '**शृणोति**' इति शुद्धम् ।

रेफयुक्तस्य रूपस्य प्रसक्तिः एव नास्ति इत्यतः रेफोकारयोः (श्रुणोति), रेफ-ऋकारयोः (श्रृणोति) वा लेखनम् अशुद्धम् ।

३५. शृतवान् — ३५. श्रुतवान्

'शृ' इति आदेशः तु शपि एव । श्रुतवान् इत्यत्र क्तवतुप्रत्यये शपः प्रसक्तिः नास्ति । अतः, 'श्रुतवान्' इति रूपं सिद्धम् ।

३६. श्रुण्वन् — ३६. शृण्वन्

'शृण्वन्' इत्यत्र शतृप्रत्ययप्रसङ्गे लटः एव शतृप्रत्ययः । अतः, तत्र शपः प्रसक्तिः नास्ति । तस्मात् 'शृ' इत्यादेशः।

।

# रूपदोषाः

| अशुद्धम् | शुद्धम् |
|---|---|
| ३७. श्रृत्वा | ३७. श्रुत्वा |

श्रुधातोः क्त्वाप्रत्यये 'श्रृ' इति आदेशः न, शपः प्रसक्तेः अभावात् । अतः, '**श्रुत्वा**' इति रूपं शुद्धम्।

| | |
|---|---|
| ३८. ग्रह्णन् | ३८. गृह्णन् |

ग्रहधातोः शतृप्रत्यये तस्य कित्त्वात् "ग्रहिज्या....." (पा.सू. ६.१.१६) इति सूत्रेण सम्प्रसारणम् । (तिङ्-शित्सार्वधातुकम् - पा.सू. ३.४.११३ ; सार्वधातुकमपित् १.२.४) सम्प्रसारणे च रेफस्य ऋकारः । तस्मात्, 'गृह्णन्' इति रूपम् । सम्प्रसारणसहितं (रेफयुक्तं) रूपम् असाधु ।

| | |
|---|---|
| ३९. गृहीतुम् | ३९. ग्रहीतुम् |

ग्रहधातोः तुमुनि न सम्प्रसारणं केनापि सूत्रेण । अतः, '**ग्रहीतुम्**' इत्येव शुद्धम्।

# रूपदोषाः

| अशुद्धम् | शुद्धम् |
| --- | --- |
| ४०. गृहीतव्यम् | ४०. ग्रहीतव्यम् |

तव्यति अपि ग्रहधातोः सम्प्रसारणं न । अतः, 'ग्रहीतव्यम्' इति रूपम् एव शुद्धम् ।

| | |
| --- | --- |
| ४१. ग्रहीतवान् | ४१. गृहीतवान् |

ग्रहधातोः क्तवतुप्रत्यये परे क्तवतुप्रत्ययस्य कित्त्वात् "ग्रहिज्या..." इति सूत्रेण सम्प्रसारणम् । सम्प्रसारणे रेफस्य ऋकारः । अतः, '**गृहीतवान्**' इत्येव रूपं शुद्धम् ।

| | |
| --- | --- |
| ४२. गृहीष्यति | ४२. ग्रहीष्यति |

'ग्रहीष्यति' इत्यत्र न सम्प्रसारणं, कित्त्वस्य ङित्त्वस्य वा अभावात् । अतः, '**ग्रहीष्यति**' इति रेफयुक्तं रूपम् एव शुद्धम्।

# रूपदोषाः

**अशुद्धम्** | **शुद्धम्**

४३. रुदति/रोदति — ४३. रोदिति

अश्रुविमोचनार्थकस्य 'रुद्'धातोः लटि प्रथमैकवचने इट् भवति - "रुदादिभ्यः सार्वधातुके" (पा.सू. ७.२.७६) इति सूत्रेण । तस्मात् '**रोदिति**' इति रूपम् । इडभावसहितं रूपम् असाधु ।

४४. आपृच्छनम् — ४४. आप्रच्छनम्

ज्ञीप्सार्थकस्य 'प्रच्छ'धातोः ल्युटि न सम्प्रसारणम् । अतः, (आ)प्रच्छनम् इति रूपम् एव शुद्धम् ।

४५. बद्धव्यम् — ४५. बन्धव्यम्

'बन्ध'धातुः नकारसहितः एव । तव्यति नकारलोपः न भवति । अतः, 'बन्धव्यम्' इति रूपम् एव शुद्धम् ।

# रूपदोषाः

| अशुद्धम् | शुद्धम् |
| --- | --- |
| ४६. बद्धुम् | ४६. बन्धुम् |

नकारसहितस्य 'बन्ध'धातोः तुमुनि नकारलोपः न । अतः, '**बन्धुम्**' इत्येव शुद्धम् ।

| | |
| --- | --- |
| ४७. लिखिष्यति | ४७. लेखिष्यति |

'**लेखिष्यति**' इत्येव प्रयोक्तव्यम् । लिखधातोः लृटि "पुगन्तलघूपधस्य च" (पा.सू. ७.३.८६) इत्यनेन गुणः स्यात् एव लघूपधत्वात् ।

| | |
| --- | --- |
| ४८. मिलिष्यति | ४८. मेलिष्यति |

'मिल'धातोः लृटि लघूपधं निमित्तीकृत्य गुणः स्यादेव । तदा, '**मेलिष्यति**' इति रूपम्।

# रूपदोषाः

| अशुद्धम् | शुद्धम् |
|---|---|
| ४९. सुधामः | ४९. सुदामा |

कुचेलापरपर्यायः 'सुदाम'शब्दः नकारान्तः । दकारश्च अल्पप्राणः । नकारान्तत्वात् प्रथमैकवचने '**सुदामा**' इति रूपम् । तत्र विसर्गस्य श्रवणं नास्ति । सुष्ठु ददाति इति (डु -दाञ् + मनिन्) सुदामा ।

| अशुद्धम् | शुद्धम् |
|---|---|
| ५०. भानुमतिः | ५०. भानुमती |

भानवः अस्य सन्ति इति विग्रहे 'भानुमान्' इति पदं सिद्ध्यति । तस्य स्त्रीत्वविवक्षायां भानुमती इति रूपम् । "उगितश्च" (पा.सू. ४.१.३) इति सूत्रेण ङीप् । अतः ईकारान्तता ।

QUESTIONS/DOUBTS?

Email us @

sanskritfromhome@vyomalabs.in

For downloading course-materials, login @
www.sanskritfromhome.in

Subscribe to our youtube channel @
vyoma-samskrta-pathasala

Buy our Samskrita-learning products @
www.digitalsanskritguru.com

Support our cause for Samskrita-Samskriti @
www.vyomalabs.in

vyoma
॥ वाचं धेनुमुपासीत ॥
Saṃskṛtam · Value Education · Technology

© All the content in this presentation is the intellectual property of Vyoma Linguistic Labs Foundation.
All materials shared in our website are purely for the purpose of personal study.
Replication/reuse in any form without written permission from the organisation is prohibited.